दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् आश्विन् शुक्लद्वितीया
आश्विन् 26 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-8 ■ वर्ष-5 ■ अङ्क-353 | 1 | अक्तूबर 12, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 आई.एन.एस.त्रिशूलः भारत-अमेरिकयोः द्विपक्षीय-सामुद्रिकाभ्यासे 'कोङ्कन-२६' इत्यस्मिन् भागं ग्रहीतुं अमेरिका-देशस्य प्लायमाउथ्-नगरम् प्राप्तः

4 जे. पी. नड्डामहोदयेन विधानसभा-निर्वाचनाय कृता हुङ्कृतिः, सुक्खूसर्वकारस्योपरि तीक्ष्णप्रहारः; उक्तवान्- हिमाचलाय अधिकारादपि अधिकं धनं दत्तम्

8 आभ्यन्तरिकविषयेषु हस्तक्षेपं न कुर्यात् संयुक्तराष्ट्रसंघः सीजेपी-प्रदर्शनोपरि संयुक्तराष्ट्रसंघस्य टिप्पण्या कुपितस्य भारतस्य स्पष्टवाक्यम्

प्रधानमन्त्री तमिलनाडु राज्ये त्रयोदश-सहस्र-कोट्यधिकरूप्यकाणां परियोजनानां शुभारम्भम् अकरोत्



प्रधानमन्त्री नरेन्द्रमोदी चेन्नइ-नगरे भारतीय-प्रौद्योगिकी संस्थानस्य प्राङ्गणे आयोजिते भव्य-समारोहे तमिलनाडु-राज्याय त्रयोदश-सहस्रकोटिरूप्यतोऽप्यधिकानां विविधानां विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च कृतवान्। एतासु परियोजनासु मार्ग-रेल-परिवहनं, पत्तन-मूलभूत संरचना पेट्रोलियम-क्षेत्रं अथ वैज्ञानिकानुसन्धान-प्रकल्पाः सम्मिलिताः सन्ति। अत्र सप्तशताधिक-त्रिसहस्रकोटिरूप्यकाणां राष्ट्रिय-राजमार्ग-कार्याणि, चेन्नई-पत्तन-विकास-परियोजनाः, अमृत-भारत-स्थानक-योजनायाः अन्तर्गतं रेल-स्थानकानां नवीनीकरणं च मुख्यम् अस्ति। अत्रावसरे तमिलनाडु-राज्यस्य मुख्यमन्त्री सी. जोसेफ-विजयः अपि उपस्थितः आसीत्। सभां सम्बोधयता प्रधानमन्त्रिणा अयं दिवसः ऐतिहासिकावसरत्वेन वर्णितः। सः अवोचत् यत् एतैः पदक्रमैः सम्पर्क-व्यवस्था सुदृढा भविष्यति, उद्योग-व्यापारयोः विस्तारः सम्पत्स्यते, राज्यस्य युवभ्यश्च नूतनाः उद्यमावसराः सृज्यन्ते। जनसेवायां स्वकीययात्रा संस्मरता श्रीमोदिना उक्तं यत् सर्वकार-प्रमुखत्वेन सः पञ्चविंशति-वर्षाणि सम्पूरितवान् यतः एकाधिक-द्विसहस्रतमस्य वर्षस्य अक्टूबर-मासे गुजरात-राज्यस्य मुख्यमन्त्रित्वेन शपथ ग्रहणात् आरभ्य प्रधानमन्त्रित्व-पर्यन्तम् इयं यात्रा अविरतं प्रचलति। सः प्रत्यपादयत् यत् भारतस्य प्रगतिः स्वकीयायाः समृद्ध-सांस्कृतिक-न्यासात्, वैज्ञानिक-उपलब्धिभ्यः, आधुनिक-मूलभूत संरचनायाश्च शक्तिं गृह्णाति। प्रधानमन्त्रिणा आईआईटी-मद्रास-परिसरे सुधा-गोपालकृष्णन्-मस्तिष्क-केन्द्रम् अपि राष्ट्राय समर्पितम्। इदं केन्द्रम् शतसंख्याधिक-मानव-मस्तिष्कानां कोशिकीय-सूक्ष्मतायाम् त्रि-आयामीय-मानचित्रीकरणस्य युगान्तरकारि-वैज्ञानिक प्रयासस्य भागः अस्ति, यत्र भ्रूणावस्थातः वार्धक्य-पर्यन्तं सम्पूर्ण आयु-कालस्य अध्ययनं भविष्यति। इतः पूर्वस्मिन् दिवसे प्रधानमन्त्रिणा चेन्नई-मेट्रो-रेल-प्रकल्पस्य द्वितीय चरणस्य पूनमल्ली-वडपलनी-मार्गखण्डः अपि लोकार्पितः, यस्य निर्माणं प्रायः नवशताधिक-चतुः सहस्र-कोटिरूप्यकैः अस्ति।

सम्प्रति सम्पूर्ण-विश्वम् उदीयमानानां नूतनाह्वानानां निवारणाय समाधानानि अन्विष्यति। एतेषां समाधान-प्रदानाय भारतस्य युवसु पर्याप्ता प्रतिभा अस्ति - प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी चेन्नई-नगरे अवोचत् यत् सम्प्रति सम्पूर्ण-विश्वम् उदीयमानानां नूतनाह्वानानां निवारणाय समाधानानि अन्विष्यति। सः दृढ-विश्वासं प्राकटयत् यत् एतेषां समाधानानां प्रदानाय भारतस्य युवसु पर्याप्ता प्रतिभा, सामर्थ्यं सम्भावनाश्च सन्ति। चेन्नई-नगरे जयगोपाल-गारोदिया-हिन्दू-विद्यालये आयोजिते स्वर्ण जयन्ती-महोत्सवे भाषमाणः प्रधानमन्त्री एतदुक्तवान् । सः विशेषतया अवदत् यत् विकसित-भारतस्य सङ्कल्पं पूरयितुं देशस्य युवशक्तिः महत्त्वपूर्णा भूमिकां निर्वक्ष्यति।

अद्यतनीयं सुभाषितम्

अनित्यं यौवनं रूपं जीवितं द्रव्यसंचयः।
ऐश्वर्यं प्रियसंवासो मुह्येत्तत्र न पण्डितः॥

अर्थात्- यौवन, रूप, जीवन, द्रव्य का संचय, ऐश्वर्य तथा स्त्री-पुत्रादि प्रियजनों से बोल-चाल, रहन सहन, ये सब अनित्य हैं; इस लिए बुद्धिमान को चाहिए कि वह इनसे मोह न करे।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्राकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमलदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा



सर्वोच्चन्यायालयेन अधिकारिभ्यः शान्तिपूर्ण-रीत्या एकत्रितानां जनानाम् अवैध-निगडनं वारयितुं सामान्यम् आवागमनं सञ्चालितुं निर्बाध-अन्तर्जालं च सुनिश्चेतुं निर्दिष्टम्

सर्वोच्चन्यायालयेन शान्तिपूर्ण-रीत्या एकत्रितानां जनानाम् अवैध-निगडनं वारयितुं सामान्यम् आवागमनं सञ्चालितुं च अधिकारिणः निर्दिष्टाः। न्यायालयेन देहल्यां मार्गावरोधाय बैरिकेडिंग व्यवस्थायाः समीक्षा मेट्रो सेवायाः समयानुसारं सञ्चालनं अन्तर्जालसेवा च निर्बाधरूपेण प्रवर्तयितुम् आदिष्टम्। न्यायालयेन उक्तं यत् अधिवक्तृणां दायित्वानां निर्वहने बाधा न कर्तव्या। सर्वोच्च न्यायालयस्य निर्देशानां कथितोल्लङ्घनाय अवमानना-कार्यचरण-सम्बद्ध याचिकायां न्यायालयेनोक्तं यत् असौ समेषां पक्षाणां मन्तव्यं श्रोष्यति सुनिश्चितं च करिष्यति यत् कस्मै अपि असौविध्यं न भवेत् ।

नवदिनात्मकः नवरात्रमहोत्सवः गतदिवसे महता उत्साहेन भक्तिभावेन च प्रारब्धः



नवदिनात्मकः नवरात्रमहोत्सवः गतदिवसे महता उत्साहेन भक्तिभावेन च प्रारब्धः। अयं महोत्सवः दुर्गादेव्याः नवानां स्वरूपाणाम् आराधनायै समर्पितः अस्ति। शारदीयनवरात्रस्य प्रथमदिने मातुः दुर्गायाः शैलपुत्री रूपस्य अर्चना विधीयते। हिमालयतनया शैलपुत्री शक्तिं स्थैर्यं नवारम्भं च द्योतयति। श्रद्धालवः देशस्य प्रसिद्धेषु देवीमन्दिरेषु दर्शनार्थं गच्छन्ति। अत्रावसरे उपराष्ट्रपतिः सी पी राधाकृष्णनः प्रधानमन्त्री नरेन्द्रमोदी च देशवासिभ्यः नवरात्रपर्वणः शुभकामनाः दत्तवन्तौ।

रेलवे-चयन-परिषदा स्नातक-स्तरीय-नियुक्तये अधिसूचना प्रकाशिता

रेलवे-चयन-परिषदा षड्विंशत्यधिक-द्विसहस्रतमस्य स्नातक-स्तरीय-नियुक्तये अधिसूचना प्रकाशिता। रेल-मन्त्रालयेन सूचितं यत् अष्टचत्वारिंशदधिक-पञ्चशतोत्तर त्रिसहस्राधिक-स्नातक-स्तरीय-पदानां कृते इयं चयन प्रक्रिया आयोज्यते। रेल-मन्त्रालयस्य विवरणानुसारम् अस्यां नियुक्ति-प्रक्रियायां चत्वारः प्रमुख संवर्गाः समाविष्टाः सन्ति, येषु मुख्य-वाणिज्यिक-सह-यात्रापत्र-पर्यवेक्षकः, वस्तुयान-प्रबन्धकः, कनिष्ठ-लेखा-सहायक-सह-टङ्ककः अथ च वरिष्ठ लिपिक-सह-टङ्ककः इत्यादीनि पदानि अन्तर्भवन्ति। अस्याः प्रक्रियायाः कृते अन्तर्जाल-माध्यमेन आवेदन-ग्रहणम् अक्टूबर-मासस्य अष्टमे दिनाङ्के प्रारब्धम्, योग्याः अभ्यर्थिनः च आगामि-मासस्य षष्ठ-दिनाङ्क यावत् स्व-आवेदन-पत्राणि प्रेषयितुं शक्नुवन्ति।

निगडिताः सीजेपी-नेतारः नवदेहल्यां विशेष-कार्यपालक-दण्डाधिकारि-न्यायालयेन विमोचिताः

गतदिने पूर्वोपाय-रूपेण निगडिताः सीजेपी-समूहस्य नेतारः अभिजीत-दीपके, आशुतोष-राङ्ङ्का सहैव सौरव-दासः इत्येते नवदेहल्यां विशेष-कार्यपालक-दण्डाधिकारि-न्यायालयेन विमोचिताः। दिल्ली-आरक्षि-दलेन संसूचितं यत् सर्वविधानां विहित-वैधिनिक-प्रक्रियाणां पालनानन्तरम् एते त्रयः जनाः अद्य प्रातःकाले दिल्ली-छावनी-स्थिते विशेष-कार्यपालक-दण्डाधिकारिणः समक्ष प्रस्तुताः । आरक्षि-प्रशासनेन स्पष्टीकृतं यत् एकवर्ष-पर्यन्तं शान्ति-व्यवस्थां सदाचारं च रक्षितुम् एतेभ्यः पञ्चाशत्-सहस्ररूप्यकाणां प्रतिभू-बन्धप्रपत्रं स्वीकृत्य मुक्तिः प्रदत्ता।

आई.एन.एस.त्रिशूलः भारत-अमेरिकयोः द्विपक्षीयसामुद्रिकाभ्यासे 'कोङ्कन-२६' इत्यस्मिन् भागं ग्रहीतुं अमेरिका-देशस्य प्लायमाउथ्-नगरम् प्राप्तः



भारतीयनौसेनायाः पोतः आई.एन.एस त्रिशूलः भारत-अमेरिकयोः द्विपक्षीयसामुद्रिकाभ्यासे 'कोङ्कन-२६' इत्यस्मिन् भागं ग्रहीतुं अमेरिका-देशस्य प्लायमाउथ्-नगरम् प्राप्तः। रक्षामन्त्रालयेन उक्तं यत् अयं अभ्यासः अमेरिकीय-नौसेनया सह क्रियते। एषः अभ्यासः प्लायमाउथ-तटस्य समीपे द्वयोः चरणयोः गुरुवासरपर्यन्तं भविष्यति। विगतदशकद्वये कोङ्कन-अभ्यासस्य व्याप्तिः विस्तारिता, जटिलता च वर्धिता, येन उभयराष्ट्रानां नौसेनानां मध्ये अन्तरक्रियाशीलता, परस्परं च अवगमनं सुदृढं जातम्।

रियादनगरे विमानपत्तनाक्रमणे द्वादशजनाः मृताः नवोत्तर-त्रिशतं जनाश्च व्रणिताः



सऊदी-अरब-प्रशासनेन एकस्मिन् वक्तव्ये प्रोक्तं यत् रियादनगरे विमानपत्तनाक्रमणे द्वादशजनाः मृताः नवोत्तर-त्रिशतं जनाश्च व्रणिताः। मृतकेषु चत्वारः सऊदी नागरिकाः अष्टौ च वैदेशिकाः सन्ति। मृतकेषु बांग्लादेशस्य द्वौ अमरीका, मिस्र, जॉर्डन, सीरिया, फिलिस्तीन सूडान देशानां च प्रत्येकं एकः नागरिकः सम्मिलितः। सऊदी अरबस्य नेतृत्वयुतया संयुत्या उक्तं यत् एतत् आतङ्क्याक्रमणं वर्तते। भारतेन अंतरराष्ट्रीय-विमान-पत्तने आक्रमणं निन्दितम्। जन-धनहानौ च चिन्ता प्रकटिता। मृतकानां परिजनान् प्रति संवेदना प्रकटिता। व्रणितानां च शीघ्रस्वास्थ्य कामना भारतेन कृता।



नेपालस्य गोरखा जनपदे बूढ़ी गंडक नद्यां जलवृद्धि-कारणेन प्रभाविताः पञ्चाशत् जनाः समुद्धारिताः

नेपालस्य गोरखा जनपदे बुढीगण्डकीनद्याः जलस्तरे आकस्मिकवृद्धेः अनन्तरं तटवर्ति निवासिनः सुरक्षितस्थानेषु गन्तुं परामृष्टाः। जलवृद्धि-कारणेन प्रभाविताः पञ्चाशत् जनाः समुद्धारिताः। अद्य प्रातः काले जलवृद्धि कारणेन अनेकानि गृहाणि जलप्रवाहे गतानि। इदानीं यावत् क्षतिः न ज्ञाता। जलस्तरे आकस्मिकवृद्धेः कारणम् अद्यापि स्पष्टं न जातम्।



विधेः छात्राः सामाजिक-परिवर्तनस्य संवाहकाः- न्यायमूर्तिः सुन्दरेशः

हिमसंस्कृतवार्ताः- शिमला।
हिमाचलप्रदेश- राष्ट्रीय- विधि- विश्वविद्यालयस्य (एनएलयू), शिमला इत्यस्य तृतीये दीक्षान्तसमारोहे सर्वोच्चन्यायालयस्य न्यायमूर्तिः एम.एम. सुन्दरेशमहोदयः अवदत् यत् हिमाचलप्रदेशः पृथिव्यां स्वर्गसदृशः अस्ति तथा च समाजे विधिस्नातकानां विशिष्टा भूमिका वर्तते। छात्रान् सम्बोधयन् सः प्रावोचत्, "विधिशास्त्रस्य छात्ररूपेण भवन्तः अन्येभ्यः पृथक् सन्ति। भवन्तः सामाजिक-अभियन्तारः, सामाजिक-चिकित्सकाः, सामाजिक-शिल्पिनः च सन्ति।" सः अवदत् यत् विधिन्याययोः प्रति सम्मानः केवलं वैधानिक- प्रावधानानां सैद्धान्तिकज्ञानेन एव सीमितः न स्यात्। प्रभावशालिन्यायव्यवस्थायाः कृते ज्ञानम्, न्यायस्य गम्भीरभावः, सामाजिकदायित्वं प्रति च दृढा निष्ठा आवश्यकी अस्ति।

कृत्रिममेधा-सदृश-नूतन-प्रविधिभ्यः सज्जाः भवन्तु छात्राः

न्यायमूर्तिः सुन्दरेशः छात्रान् नवोद्भूत-आह्वानेभ्यः सन्नद्धाः भवितुं विशेषतया च कृत्रिममेधा (AI) इत्यनेन सह नूतनक्षेत्रेषु विशेषज्ञतां प्राप्तुं प्रेरितवान्। सः अवदत् यत् कृत्रिममेधायाः समाजे व्यापकः प्रभावः भविष्यति, विधिव्यवसायेऽपि च महत्त्वपूर्णाः परिवर्तनाः भविष्यन्ति। छात्रैः प्राविधिक-प्रगतिः अङ्गीकार्या, परिवर्तनानुकूलं स्वयं सज्जीकर्तव्यं, निरन्तरं ज्ञानार्जनं च करणीयम्। सः न्यवेदयत् यत् विधेः छात्रैः स्वज्ञानं निरन्तरं परिष्कार्यम्, परिवर्तनशीलपरिस्थितिभिः सह अग्रेसराः भवितुं च तत्परैः भाव्यम्।

एनएलयू- दीक्षान्तसमारोहे अवदत् सुक्खूमहोदयः- निर्बलवर्गेभ्यः न्यायप्रदानमेव अस्य वास्तविकम् उद्देश्यम्



हिमसंस्कृतवार्ताः- शिमला।

हिमाचलप्रदेश- राष्ट्रीय- विधि- विश्वविद्यालयस्य (एनएलयू), शिमला इत्यस्य तृतीये दीक्षान्त-समारोहे मुख्यमन्त्री सुखविन्दरसिंहसुक्खूमहोदयः अवदत् यत् न्यायस्य वास्तविकम् उद्देश्यं समाजस्य दुर्बलवर्गेभ्यः न्यायसुनिश्चितीकरणम् अस्ति। लोकतन्त्रे न्यायः केवलं न्यायिक-आदेशेषु एव सीमितः न भवति, अपि तु अस्मिन् निष्पक्षता, विवेकशीलता, प्रत्येकस्य प्रकरणस्य परिस्थितीनां सम्यक् अवगमनं चापि अनिवार्यम् अस्ति।

मुख्यमन्त्री प्रावोचत् यत् विधेः न्यायस्य च सार्थकता तदैव वर्तते, यदा समाजस्य दुर्बलतमेभ्यः वर्गेभ्यः अपि न्यायप्राप्तेः आशा भवेत्, आवश्यकतावतां ध्वनिः श्रूयेत, प्रत्येकस्मै नागरिकायापि स्वकीयानाम् अधिकाराणां रक्षणे विश्वासः स्यात्। सः विधि-स्नातकान् स्वज्ञानस्य कौशलस्य च उपयोगं न्यायस्य, समानतायाः, सांविधानिकमूल्यानां च संवर्धनाय कर्तुम् आहूतवान्।

न्यायिकव्यवस्था-वित्तीयदायित्वयोः उपरि प्रस्तुताः विचाराः

मुख्यमन्त्री न्यवेदयत् यत् राज्यसर्वकारः सामान्यनागरिकेभ्यः समयबद्धन्यायं प्रदातुं न्यायिकव्यवस्थायाः सुदृढीकरणाय बद्धपरिकरः अस्ति। सः न्यायपालिकां लोकतन्त्रस्य महत्त्वपूर्णं स्तम्भं प्रतिपाद्य अकथयत् यत् संविधानस्य त्रयाणाम् अङ्गानां मूलम् उद्देश्यं नागरिकाणां सेवा, तेषाम् अधिकाराणां संरक्षणं च वर्तते। सः अवदत् यत् सर्वकारीय-योजनानाम् उपक्रमाणां च क्रियान्वयने केषाञ्चन न्यायिकनिर्णयानां कारणात् व्यावहारिककठिनताः सम्मुखीभवन्ति। सः नियुक्तिनियमानां कर्मचारिभ्यः वित्तीयलाभप्रदानस्य च सम्बद्धप्रकरणानाम् उल्लेखं कुर्वन् अकथयत् यत् कैश्चन निर्णयैः राज्यस्य राजकोशे अतिरिक्तभारः आपतति। मुख्यमन्त्रिणा २००३-तमे वर्षे अनुबन्धकर्मचारिभ्यः वरिष्ठतायाः वेतनवृद्धेः च लाभं न दातुं कृते सर्वकारीयनिर्णये दृष्टिक्षेपः कृतः। सः अवदत् यत् प्रायः द्विदशकपश्चात् न्यायालयः नियुक्तिनियमेषु स्पष्टप्रावधानस्य अभावेऽपि वित्तीयलाभप्रदानाय निर्देशादिकं कृतवान्। सः स्पष्टीकृतवान् यत् कोऽपि निर्वाचितः सर्वकारः स्वकर्मचारिणः तेभ्यः प्राप्येभ्यः वित्तीयलाभेभ्यः वञ्चितान् कर्तुं न इच्छति, किन्तु राज्येन स्वसंसाधनानां राजकोषीय- दायित्वानां च ध्यानमपि रक्षितव्यं भवति। जनहितस्य, नियमानां, वित्तीयस्थितेश्च मध्ये सन्तुलनस्थापनं शासनस्य महत्त्वपूर्णं दायित्वम् अस्ति।

पर्वतीयराज्ये क्रीडाङ्गण-उपयोगे अपि मुख्यमन्त्रिणः वक्तव्यम्

हिमाचलप्रदेशस्य भौगोलिकपरिस्थितीनाम् उल्लेखं कुर्वन् मुख्यमन्त्री अवदत् यत् पर्वतीयराज्यत्वात् क्रीडाङ्गणानां निर्माणाय पर्याप्तायाः भूमेः उपलब्धिः आह्वानात्मकं वर्तते। ईदृश्याम् अवस्थायाम् उपलब्धसंसाधनानां समुचितोपयोगाय विद्यालयानां सामुदायिकक्रीडाङ्गणानां च सहभागीय-उपयोगः प्रोत्साहनीयः। तेन विज्ञापितं यत् राज्यसर्वकारेण प्रथमतया स्वतन्त्रतादिवस-समारोहस्य आयोजनाय पञ्चलक्षरूप्यकाणां राशिः संप्रदत्ता। उच्चन्यायालयेन एकस्य राजकीयविद्यालयस्य क्रीडाङ्गणोपयोगाय निश्चितराशेः संवितरणस्य समयस्य अनुमतिः प्रदत्ता आसीत्। मुख्यमन्त्री हिमाचलप्रदेश- विश्वविद्यालये राष्ट्रीय- विधि-विश्वविद्यालये च आधारभूतसुविधानां सुदृढीकरणाय सर्वकारपक्षतः सर्वसम्भवसहयोगं दातुं प्रतिश्रुतवान्। सः अवदत् यत् विश्वविद्यालयप्रशासनस्य, प्राध्यापकानां, छात्राणां सर्वकारस्य च सामूहिकप्रयासैः एनएलयू-शिमला- संस्थानं शिक्षायाः, विधिसंशोधनस्य, शैक्षणिकोत्कृष्टतायाश्च प्रमुखकेन्द्रत्वेन प्रतिष्ठापयिष्यते।



उच्चतरक्षेत्रेषु हिमपातः, वर्षया शीतं तीव्रं कृतम्, अक्तूबरमासस्य १५ दिनाङ्कपर्यन्तं पीतसचेतना

हिमसंस्कृतवार्ताः- शिमला।

अक्तूबरमासे एव हिमाचलप्रदेशे शिशिरस्य तीव्रता आरब्धा अस्ति। राज्यस्य उच्चपर्वतक्षेत्रेषु रविवासरे रोहताङ्गदर्रा, शिन्कुला च सहितेषु नवीनः हिमपातः अभवत्, शिमलासहितेषु अनेकेषु समतल-मध्यपर्वतक्षेत्रेषु च वर्षायां तापमानस्य महती न्यूनता अभवत्। अपराह्णे शिमलानगरे आकस्मिकं अन्धकारं कृत्वा चालकाः दीपं प्रज्वलितवन्तः वाहनचालनं कर्तुं बाध्यन्ते स्म। ऋतुविभागस्य विवरणानुसारं विगत २४ होरासु राज्यस्य विभिन्नेषु भागेषु आदिनं च वर्षा अभवत्। काङ्गयां ३१.२ मि.मी., सरहाने ३०.१ मि.मी., ऊनायां २२ मि.मी., धर्मशालायां १२.१ मि.मी., पालमपुरे ११ मि.मी., सोलने १० मि.मी., सुन्दरनगरे ५.६ मि.मी., शिमलायां ४ मि.मी. मनाली, सुन्दरनगरम्, मण्डी, कुफरी इत्यत्र अपि लघुतः मध्यमपर्यन्तं वर्षा अभवत्।

ऋतुविज्ञानकेन्द्रस्य अनुसारं सक्रिय- पाश्चात्य-विकारस्य कारणात् राज्यस्य ऋतुः अक्टोबर् १५ दिनाङ्कपर्यन्तं प्रतिकूलः एव तिष्ठति।अस्मिन् काले बहुषु स्थानेषु वज्रपातस्य, विद्युत्पातस्य, प्रचण्डवृष्टेः/हिमपातस्य च पीतसचेतना कृता अस्ति। अक्टोबर् १२ तः १५ पर्यन्तं राज्यस्य अनेकेषु भागेषु लघुतः मध्यमपर्यन्तं वर्षा, उच्चपर्वतक्षेत्रेषु हिमपातः अपि सम्भावितः अस्ति। परन्तु अक्टोबर् १६, १७ दिनाङ्केषु ऋतुः स्वच्छः भविष्यति इति अपेक्षा अस्ति, एतयोः दिवसयोः कृते कोऽपि सचेतना न दत्ता। प्रशासनेन जनान् पर्यटकान् च प्रतिकूल-ऋतोः कारणात् उच्चोच्चक्षेत्रेषु न गन्तुं परामर्शः दत्तः।

पर्यटकानां प्रथमं वरणं सिस्सू, लाहुल-उपत्यकायां पर्यटकानां महती संमर्दः



अटल-सुरङ्ग-रोहताङ्ग-मार्गेण लाहुल-उपत्यकां प्राप्नुवतां पर्यटकानां कृते एतेषु दिनेषु सिस्सू-सरोवरः निर्झरः च आकर्षणस्य प्रमुखं केन्द्रं जातौ स्तः। मनाल्याः हरितिमापूर्णाभ्यः उपत्यकाभ्यः निर्गत्य पर्यटकाः यथा एव अटल-सुरङ्गायाः दक्षिण-द्वारात् (साउथ पोर्टल) उत्तर-द्वारं (नॉर्थ पोर्टल) प्रति प्राप्नुवन्ति, प्रकृतेः परिवर्तितं दृश्यं तान् रोमाञ्चयति। उन्नताः पर्वतमालाः, शिखरेषु हिमस्यानुलेपनम् (श्वेतपटम्), शान्तं वातावरणं चन्द्रानद्याः च मनोहरं दृश्यं पर्यटकान् स्वप्रति आकर्षयति। अटल-सुरङ्गायाः उभौ तटौ अपि पर्यटकानां कृते स्मरणीय-छायाचित्राणि ग्रहीतुं प्रियस्थलौ जातौ स्तः।

जे. पी. नड्डामहोदयेन विधानसभा-निर्वाचनाय कृता हुङ्कृतिः, सुक्खूसर्वकारस्योपरि तीक्ष्णप्रहारः; उक्तवान्-

हिमाचलाय अधिकारादपि अधिकं धनं दत्तम्



हिमसंस्कृतवार्ताः- कुल्लू।
हिमाचलप्रदेशे २०२७ तमात् वर्षात् पूर्वमेव निर्वाचनवातावरणं निर्मितं दृश्यते। केन्द्रीय-स्वास्थ्य-, परिवारकल्याण-, रसायन- तथा उर्वरकमन्त्रिणा, भाजपपक्षस्य पूर्वेण राष्ट्रियाध्यक्षेण जगतप्रकाशनड्डामहोदयेन मनाली- विधानसभाक्षेत्रस्य पतलीकूहलस्थाने जनप्रतिनिधि- कार्यकर्तासम्मेलनं सम्बोधितम्। नड्डामहोदयेन हिमाचलप्रदेशस्य मुख्यमन्त्रिणं सुखविन्दरसिंहसुक्खू-महोदयं लक्ष्यीकृत्य तीक्ष्णः प्रहारः कृतः। नड्डामहोदयः अवदत् यत् सुक्खू-सर्वकारस्य दशा 'नृत्यं न जानाति अङ्गणं वक्रमिति' (नाच न जाने आँगन टेढ़ा) सदृशी अस्ति। सः अकथयत् यत् केन्द्रसर्वकारेण हिमाचलप्रदेशाय तस्य अधिकारादपि अधिकं धनं प्रदत्तं, किन्तु सुक्खूसर्वकारः तत् धनं व्ययीकर्तुमेव न जानाति। केन्द्रस्य योजनानां लाभः प्रदेशस्य जनसामान्यं यावत् न प्राप्नोति। सः अवदत् यत् मोदीसर्वकारेण हिताचलाय 'अटल-सुरङ्गम्', चतुष्पथम्, 'एम्स', आयुर्विज्ञानमहाविद्यालयान्, आपदः काले सहस्रकोटिरूप्यकाणां साहाय्यं प्रदत्तं, किन्तु राज्यसर्वकारः केवलं विलापं कुर्वन् अस्ति। विकासस्य स्थाने काङ्ग्रेससर्वकारः केवलं मिथ्याघोषणामेव करोति। नड्डामहोदयः कार्यकर्तॄन् आहूतवान् यत् ते जनान् सत्यं श्रावयन्तु तथा च २०२७ तमस्य वर्षस्य निर्वाचनाय अधुनातः एव कटिबद्धाः भवन्तु।

द्वादशसु वर्षेषु हिमाचलस्य विकासाय प्राप्ता गतिः

सम्मेलने केन्द्रीयमन्त्रिणा जे.पी. नड्डामहोदयेन केन्द्रसर्वकारस्य उपलब्धीः परिगणयता उक्तं यत् मोदी-सर्वकारेण हिमाचलस्य विकासाय अभूतपूर्वकार्याणि कृतानि। जगतप्रकाश-नड्डामहोदयेन प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वाधीनस्य केन्द्रसर्वकारस्य द्वादश (१२) वर्षाणि भारतस्य इतिहासे स्वर्णिमकालत्वेन वर्णितानि तथा चोक्तं यत् एतानि वर्षाणि विकसितभारतस्य दृढां भित्तिं स्थापयितुं परिवर्तनकारी कालखण्डः अभवन्। सः प्रावोचत् यत् एतेषु द्वादशसु वर्षेषु हिमाचलप्रदेशाय विकासस्य नूतना गतिः प्राप्ता, विशेषतया मार्ग- स्वास्थ्य- आधारभूतसंरचनाक्षेत्रेषु ऐतिहासिकानि कार्याणि संवृत्तानि।

योजनाः जन-जनं यावत् प्रापयन्तु

कीरतपुर-मनाली-चतुष्पथः, रोहताङ्गस्थितं अटल-आन्तर्भौमिकमार्गः, स्वास्थ्य- शिक्षाक्षेत्रयोः केन्द्रेण कोटिशः रूप्यकाणां योजनाः प्रदत्ताः। सः कार्यकर्तॄन् केन्द्रस्य योजनाः जन-जनं यावत् प्रापयितुम् आह्वानम् अकरोत्। जगतप्रकाशनड्डा- महोदयेन उक्तं यत् बिलासपुरे 'एम्स' संस्थानस्य, नूतनानाम् आयुर्विज्ञानमहाविद्यालयानां स्थापनायाः तथा राष्ट्रीयराजमार्गाणां निर्माणेन हिमाचलप्रदेशस्य स्वरूपं सम्पूर्णतया परिवर्तितम्।

२०२७ तमे वर्षे भाजपा-सर्वकारस्य निर्माणाय आह्वानम्

सः अवदत् यत् एताभिः परियोजनाभिः न केवलं प्रदेशे स्वास्थ्यसेवाः सुदृढाः अभवन्, अपि तु सम्पर्कव्यवस्थायामपि अभूतपूर्वं परिवर्तनं जातम्, येन प्रदेशस्य दूरस्थक्षेत्राणि यावत् विकासः सम्प्राप्तः।

नवरात्रिपर्वणि मिथिला महिला समित्या सांस्कृतिककार्यक्रमैः दुर्गादेव्याः आराधना



'जय जय भैरवि असुरभयाउनि पशुपति भामिनि माया' इत्यादिभिः भक्तिगीतैः भक्तिमयमभवत् विद्यापतिसभागारम्।
बोकारो। प्रतिष्ठिता सामाजिक-सांस्कृतिकसंस्था मिथिला सांस्कृतिक परिषदः बोकारो-शाखायाः मिथिला महिला समित्या नवरात्रिमहोत्सवस्यावसरे शनिवासरे सायंकाले सेक्टर-४-स्थिते मिथिला एकेडमी पब्लिक स्कूल-परिसरस्य विद्यापतिसभागारे विविधैः सांस्कृतिककार्यक्रमैः सह दुर्गादेव्याः भक्तिपूर्वकम् आराधनं कृतम्। अस्मिन्नवसरे समित्या विद्यालयाय पञ्चाशत्-लीटरजलधारणक्षमतायुक्तौ द्वौ जलशोधकयन्त्रौ (वाटर फिल्टर) प्रदत्तौ। समित्याः अध्यक्षा पूनम मिश्रा तथा सचिवा आभा झा इत्यनयोः नेतृत्वे आयोजितेऽस्मिन् कार्यक्रमे शीला मिश्रा, किरण मिश्रा, नमिता झा, सीमा झा, रुबी ठाकुर, रंजना भगत, जयन्ती पाठक, बीना झा, आशा झा, बीनू चौधरी, पूनम झा, रितु मिश्रा, अलका झा, रुचि प्रेरणा, विनीता राय, बबीता झा, प्रेरणा ओझा, सुशीला यादव, उषा, राजकुमारी झा इत्यादयः महिलाः भगवत्याः दुर्गायाः आरतीम् अकुर्वन्। ताभिः 'जय जय भैरवि असुरभयाउनि पशुपति भामिनि माया', 'जगदम्ब अहीं अवलंब हमर हे माय, अहाँ बिनु आस ककर' इत्यादीनां भक्तिगीतानां सुमधुरगायनेन सम्पूर्णं सभागारं भक्तिरसेनापूरितम्। तदनन्तरं समितेः सदस्याभिः मिथिलायाः पारम्परिकस्य झिझिया-नृत्यस्य मनोहारिणी प्रस्तुतिर्दत्ता। अनन्तरं गुजरातस्य प्रसिद्धस्य डाण्डिया-नृत्यस्यापि सुन्दरी प्रस्तुतिर्दर्शकान् आनन्दितवती। किरण मिश्रा, आशा झा, रंजना, पूनम तथा नमिता इत्येताभिः भक्तिगीतानि प्रस्तुतानि। बीनू चौधरी, बबीता झा, रुचि प्रेरणा तथा विनीता राय इत्येताभिः मनोहारिणी नृत्यप्रस्तुतयः कृताः। कार्यक्रमस्यावसरे समित्याः अध्यक्षा पूनम मिश्रा सर्वेभ्यः नवरात्रिपर्वणः शुभकामनाः प्रदत्तवती। तया कथितं यत् समित्या समये-समये मिथिलायाः कला-संस्कृतीसम्बद्धाः विविधाः सांस्कृतिकगतिविधयः आयोज्यन्ते। तदतिरिक्तं समाजसेवासम्बद्धानि कार्याण्यपि समित्या निरन्तरं क्रियन्ते।



दशदिवसीय- संस्कृतसम्भाषण- कार्यशालायाः समापनम्

हिमसंस्कृतवार्ताः- उत्तरप्रदेशस्य गौरवशालिन्याः ऐतिहासिकधरोहरस्य कानपुरस्य डी.ए.वी. महाविद्यालयस्य संस्कृतविभागेन आयोजिता दशदिवसीय- संस्कृतसम्भाषण- कार्यशाला ३० सितम्बर २०२६ दिनाङ्कात् आरभ्य ०९ अक्तूबर २०२६ पर्यन्तं सञ्चालिता। अस्याः कार्यशालायाः समापनम् १० अक्टोबर २०२६ दिनाङ्के महाविद्यालयस्य डा. नागेन्द्रस्वरूप- स्मार्ट-हॉलकक्षे अभवत्, यत्र कार्यशालायाः प्रशिक्षूणां प्रमाणपत्राणि वित्तानि।

अस्मिन्नवसरे महाविद्यालयस्य प्राचार्यः प्रो. मनोज जौहरी संस्कृतविभागं दशदिवसीय-संस्कृतसम्भाषण- कार्यशालायाः सफलायोजनाय साधुवादं प्रदायोत्सहितवन्तः, सर्वेषां प्रशिक्षूणाम् उज्ज्वलभविष्यस्य च कामनां कृतवन्तः।

संस्कृतसम्भाषणकार्यशालायाः संयोजकः डॉ. सवितुरप्रकाशगंगवारः दशदिवसीय-संस्कृतसम्भाषण- कार्यशालायां भागिनां प्रशिक्षूणाम् उत्साहं रेखाङ्कितं कृत्वा सम्पूर्णकार्यशालायाः रूपरेखां प्रस्तुतवन्तः।

अस्मिन्नवसरे प्रशिक्षवः संस्कृतेन स्वागतगीतं, संस्कृतएकाङ्कीनाटकं, संस्कृतप्रहसनमित्यादीनां विधानां माध्यमेन स्वकीयां दक्षतां प्रदर्शितवन्तः।

अस्याः कार्यशालायाः प्रशिक्षिका पलक औदीच्य आभासीयमाध्यमेन, प्रशिक्षकः सागर चौधरी भौतिकरूपेण अत्युत्साहेन प्रशिक्षणकार्यक्रमस्य सञ्चालनं कृतवन्तौ। अस्यां प्रशिक्षणकार्यशालायां आद्रिकामिश्रावर्या तकनीकीसहयोगं प्रदत्तवती।

अन्यैः सहयोगिभिः- डा. मिथलेशगंगवार, प्रांजल, आस्थाशुक्ला, सौम्या, पूर्णिमातिवारी, शुचिगुप्ता, उन्नतिगुप्ता, पलकशर्मा, अंशिका, श्रद्धा, प्रीतिगुप्ता, शौर्यः, एकताश्रीवास्तवः, सतेन्द्रकुमारः, रतीशझा, अर्चनासिंहः, कमलः, आशीषकुमारः, विजयकुमारयादवः, अर्पणा, कवितासक्सेना, सृष्टिसक्सेना, उमा आदिभिः पूर्णः सहयोगः प्रदत्तः।

डी.ए.वी. महाविद्यालयस्य एम.ए.सी. गणित-योगडिप्लोमा- पाठ्यक्रमस्य छात्रा कौमुदीयादवः कार्यशालायाः स्वानुभवान् संस्कृतभाषया प्रस्तुतवती। इयं कार्यशाला पूर्णतया निःशुल्कत्वेन केवलं संस्कृतभाषायाः प्रचारप्रसारायैव आयोजितासीत्, यस्यां राष्ट्रस्य विभिन्नप्रान्तेभ्यः प्रशिक्षवः ऑनलाइनमाध्यमेन प्रशिक्षणं प्राप्तवन्तः।

संस्कृतविभागाध्यक्षः प्रो. विनोदकुमारपाण्डेयः सर्वेषां प्रशिक्षूणां कृते मङ्गलकामनाो व्यक्तवन्तः। महाविद्यालयस्य वरिष्ठप्राध्यापकाः प्रो. अनुरागसक्सेना, चीफप्राक्टर प्रो. लोकेशसक्सेना, छात्रकल्याणअधिष्ठाता प्रो. पंकजटंडन, प्राचार्या नमिनी प्रो. रोमलसक्सेना, वरिष्ठप्राध्यापकः प्रो. एस. एस. कालरा, आई.क्यू.ए.सी. कोआर्डिनेटर डॉ. सुरेन्द्रप्रतापसिंहः, डॉ. अमितद्विवेदी, योगप्रशिक्षिका कंचनगुप्ता, एम.के.सिंह, वर्शर- अभिजीतगुप्ता, प्रो. श्रीरामजीप्रसादः, प्रो. पुष्पेन्द्रत्रिपाठी, प्रो. अभिषेकश्रीवास्तवः, प्रो. शैलजामिश्रा, प्रो. सुषमानिषादः, प्रो. शिवानीनिगमः प्रमुखाः शिक्षकगणाः उपस्थिताः आसन्।

कार्यक्रमस्य समापने कार्यशालायाः संयोजकः डा. सवितुरप्रकाशगंगवार आगन्तुकान्, वरिष्ठप्राध्यापकान्, प्रशिक्षून्, पत्रकारबन्धूंश्च प्रति तेषां पूर्णसहयोगाय धन्यवादं ज्ञापितवन्तः।

प्रेषिका - प्रांजल (कानपुर नगरम्)

प्रथमे नवरात्रे लक्षं चत्वारिंशत्सहस्रं च भक्ताः नतमस्तकाः अभवन्, विविधवर्णपुष्पैः सुसज्जितानि मन्दिराणि, उच्चैः जयघोषाः प्रवर्तिताः



हिमसंस्कृतवार्ता-धर्मशाला।

प्रदेशस्य शक्तिपीठेषु शारदीय-नवरात्र-महोत्सवस्य प्रथमे दिवसे एकलक्षं चत्वारिंशत्सहस्रं पञ्चशतं च (१,४०,५००) भक्ताः मातुः दर्शनं कृतवन्तः। प्रदेशस्य पञ्चसु प्रमुखशक्तिपीठेषु—चिन्तपूर्णी, ज्वालाजी, श्रीनयनादेवी, ब्रजेश्वरीदेवी, चामुण्डादेवी मन्दिरेषु च नवरात्र-महोत्सवस्य आरम्भः कन्यापूजनेन ध्वजारोहणविधिना च सह अभवत्। नवरात्र-महोत्सवस्य प्रथमे दिवसे रविवासरे मातुः दर्शनार्थं प्रदेशस्य शक्तिपीठेषु भक्तानां महती संमर्दः (भीड़) संजाता। देव्याः दर्शनार्थं मन्दिरेषु भक्तानां दीर्घाः पङ्क्तयः दृश्यन्ते स्म। मन्दिराणाम् उद्घाटनस्य निमीलनस्य च समयः अपि निश्चितः कृतः अस्ति।

चिन्तपूर्णी-मन्दिरे पञ्चत्रिंशत्सहस्रं भक्ताः नतमस्तकाः अभवन्

चिन्तपूर्णी-मन्दिरस्य अधिकारी सञ्जीवप्रभाकरः अवदत् यत् प्रथमे दिवसे पञ्चत्रिंशत्सहस्रं (३५,०००) भक्ताः शिरः अवनमय्य प्रणामं कृतवन्तः। मन्दिरे भक्तानां सुगमदर्शनार्थम् उत्तमाः प्रबन्धाः कृताः सन्ति।

चामुण्डामन्दिरे सार्धद्विसहस्रं भक्ताः शीशं नमितवन्तः

चामुण्डादेवी-मन्दिरे पञ्चशतद्विसहस्रं (२,५००) भक्ताः मातुः चरणयोः प्रणामम् अकुर्वन्। मन्दिरस्य अधिकारी राकेशकुमारः सूचितवान् यत् नवरात्रेषु विशेषपूजा-अर्चना भविष्यति। मन्दिरे भक्तानां सुरक्षार्थं सुदृढाः प्रबन्धाः विहिताः सन्ति।

ब्रजेश्वरी-मन्दिरे त्रिसहस्रं भक्ताः शिरः अवनमितवन्तः

काङ्गड़ास्थे ब्रजेश्वरीदेवी-मन्दिरे नवरात्र-महोत्सवस्य प्रथमे दिवसे त्रिसहस्रं (३,०००) भक्ताः मातुः चरणेषु प्रणिपत्य आशीर्वादं प्राप्तवन्तः। मातुः दर्शनार्थं मन्दिरेषु भक्तानां पङ्क्तयः संलग्नाः आसन्। नवरात्र-पर्वार्थं विविधवर्णैः सुगन्धितैः पुष्पैः मातुः मन्दिराणि सुसज्जितानि सन्ति।

श्रीनयनादेवी-मन्दिरे षष्टिसहस्रं भक्ताः उपस्थिताः अभवन्

श्रीनयनादेवी-मन्दिरे नवरात्रस्य प्रथमे दिवसे रविवासरे षष्टिसहस्रं (६०,०००) भक्ताः मातुः चरणयोः नतमस्तकाः अभवन्। श्रीनयनादेवी-मन्दिर-न्यासस्य अध्यक्षः धर्मपालचौधरी महोदयः न्यवेदयत् यत् मन्दिर-न्यासस्य पक्षतः भक्तानां सौकर्यार्थम् उत्तमाः व्यवहाराः व्यवस्थाः च कृताः सन्ति।

ज्वालामुखी-मन्दिरे चत्वारिंशत्सहस्रं भक्ताः आशीर्वादं लब्धवन्तः

ज्वालाजी-मन्दिरे प्रथमे नवरात्रे चत्वारिंशत्सहस्रं (४०,०००) भक्ताः माथा नमितवन्तः। मन्दिराधिकारी अजयमण्डयालः अवदत् यत् शारदीय-नवरात्र-महोत्सवस्य आरम्भः कन्यापूजनेन ध्वजारोहणविधिना च संजातः।





संस्कृतिः अस्माकं मूलम्, इतः दूरं न गन्तव्यम्– आशीष-जैस्वालः

हिमसंस्कृतवार्ताः- डॉ. रेणुका बोकारे रामटेकम्। महाराष्ट्रशासनस्य मराठी-भाषाविभागस्य, कविकुलगुरु- कालिदास-संस्कृत- विश्वविद्यालयस्य (रामटेकम्) संयुक्ततत्त्वावधाने 'अभिजात- मराठीभाषा-सप्ताहः– २०२६' इत्यस्य अन्तर्गततया रविवासरे, ११ अक्तोबर् २०२६ दिनाङ्के एकस्य विशेष-कार्यक्रमस्य आयोजनं कृतम्।

अस्मिन् कार्यक्रमे महाराष्ट्र-राज्यस्य वित्त-, नियोजन- कृषि- सहायता-पुनर्वास-, विधि-न्याय- श्रम-राज्यमन्त्री, रामटेक-क्षेत्रस्य विधायकः माननीयः आशीष-जैस्वालमहोदयः प्रमुख-अतिथिरूपेण उपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षता कविकुलगुरु- कालिदास- संस्कृत-विश्वविद्यालयस्य कुलगुरुणा डॉ. अतुल वैद्येन कृता। मराठी-भाषा-विभागस्य सञ्चालकः डॉ. श्यामकान्तदेवरे, विशेष- कार्यकारी- अधिकारी राजेश सोलंके, संस्कृत- संस्कृतेतर- साहित्य-सङ्कायस्य अधिष्ठात्री प्रो. कविता- सुनील होले विशेष-अतिथिरूपेण उपस्थिता आसन्। कार्यक्रमस्य समन्वयकः डॉ. राजेन्द्र जैनः मञ्चे उपस्थितः आसीत्।

मान्यवरैः कृतस्य दीपप्रज्वलनेन कार्यक्रमस्य शुभारम्भः जातः। कार्यक्रमस्य प्रस्तावना प्रो. कविता-होले-महोदयया प्रदर्शिता। तयोक्तं यत् भाषा अस्माकं अस्मिता वर्तते। अतः प्रत्येकेन जनेन गृहे, सार्वजनिक-स्थानेषु, कार्यस्थलेषु च स्वभाषायाः प्रयोगः करणीयः। तदैव मराठी-भाषायाः प्रवाहः निरन्तरं स्थास्यति।

मुख्यातिथिः आशीष-जैस्वालः अवदत् यत्- "संस्कृतिः अस्माकं मूलम् अस्ति। वयं स्वमूलेभ्यः दूरं न गच्छेम। सातवाहन-कालीन-शिलालेखेभ्यः आरभ्य महानुभावपन्थं सन्त-तुकारामस्य अभङ्गांश्च यावत् मराठी-भाषया स्वकीया महत्त्वपूर्णा अभिज्ञानता स्थापिता। आधुनिक-तन्त्रज्ञानस्य माध्यमेन वयं स्वसमृद्धस्य इतिहासस्य संरक्षणं कुर्याम। वस्तुतः येषु विषयेषु अस्माकं गर्वः भवेत्, तान्येव वयं विस्मरामः। महाराष्ट्रे अस्माभिः परस्परं मराठी-भाषया संवादः करणीयः। अहमपि प्रायशः मराठी-भाषया एव भाषणं ददामि।"

तेन सूचितं यत् महाराष्ट्र-शासनेन सम्प्रति द्वौ महत्त्वपूर्णौ निर्णयौ स्वीकृतौ रामटेकनगरे महाकवि- कालिदाससृष्टेः निर्माणं तथा च महाकवि- कालिदासमहोदयं पुरस्कृत्य एकस्य चलचित्रस्य निर्माणाय प्रयास-करणम्।

मराठी-भाषया प्राप्तं शास्त्रीयभाषायाः (अभिजात-भाषायाः) पदम्, अस्याः समृद्धा साहित्यिकपरम्परा, सांस्कृतिक-निक्षेपः तथा च भाषायाः संरक्षणाय आवश्यकानां गतिविधीनां विषये जनजागृति-उत्पादनम् अस्य सप्ताहस्य प्रमुखम् उद्देश्यम् अस्ति। ईदृशानां कार्यक्रमाणां माध्यमेन मराठी-भाषायाः गौरवशालिनीं परम्परां नूतनसन्ततिं यावत् प्रापयितुं सहैव भाषा-साहित्य-संस्कृतीनां मध्ये सम्बन्धं दृढीकर्तुं प्रयासो विधीयते। पुस्तक-ग्रामात् आरभ्य अन्ताराष्ट्रियस्तरीयाणि साहित्यसम्मेलनानि यावत् विविधाः गतिविधयः आयोज्यन्ते। एते विचाराः मराठी-भाषा-विभागस्य सञ्चालकेन डॉ. श्यामकान्त-देवरे-महोदयेन व्यक्ताः।

भाषासंवादेन जीवन्ती तिष्ठति- डॉ. अतुलवैद्यः

अध्यक्षीय-भाषणे कुलगुरुणा डॉ. अतुलवैद्येन उक्तं यत्- "भाषा संवादेन जीवन्ती तिष्ठति। मराठी-भाषायां विभिन्नेषु कालखण्डेषु बहूनि परिवर्तनानि सञ्जातानि। सन्त-ज्ञानेश्वरस्य, सन्त-तुकारामस्य, सन्त-नामदेवस्य च मराठी-भाषायां भेदो दृश्यते। प्रत्येकं क्रोशद्वये (अष्टकोशेषु) भाषा अर्थात् उपभाषा परिवर्तते। इतश्च साहित्यकाराणां सामाजिक- चिन्तकानां च भाषायामपि परिवर्तनं दृश्यते। मराठी-भाषायाः संरक्षणं प्रत्यक्ष-संवादेन, साहित्य-सृजनेन, प्रचार-प्रसारेण च एव सम्भवम् अस्ति।" डॉ. वैद्येन इदमपि प्रत्याशितं यत् मराठी-भाषासम्बद्धाः कार्यक्रमाः निरन्तरम् आयोजनीयाः।

उद्घाटनसत्रानन्तरं घण्टात्रयस्य उत्कृष्टः सांस्कृतिककार्यक्रमः प्रस्तुतितः। अस्मिन् गायनस्य, नृत्यस्य, वादनस्य च विविध-प्रस्तुतीनां माध्यमेन महाराष्ट्रस्य मराठी-संस्कृतेः लोकपरम्पराणां च मनोहारि दर्शनं कारितम्। अस्मिन् अवसरे कलावतः अभिजीत कोसम्बी, प्रसेनजित कोसम्बी, अभिनेतुः दिगम्बरनाईक- महोदयस्य विशेष-सत्कारः कृतः।

कार्यक्रमस्य सञ्चालनं डॉ. सुमितकठाले-महोदयेन कृतम्, यदा तु विश्वविद्यालयस्य कुलसचिवेन डॉ. रोशन-अलोनेमहोदयेन धन्यवादज्ञापनं कृतम्। अस्य कार्यक्रमस्य लाभः विश्वविद्यालयेन सम्बद्धैः कुल-३०४-महाविद्यालयैः यूनलिकामाध्यमेन जाले प्राप्तः। संस्कृतभाषा एवं साहित्य-विभागस्य छात्रैः अभिजात-मराठी-भाषायाः विषयवस्तुम् आधृत्य विविधाः आकर्षकाः रङ्गावल्यः अपि रचिताः।

मराठी-हस्तलेख-प्रदर्शनीं प्रति उत्स्फूर्तः प्रतिभावः

कविकुलगुरु- कालिदास- संस्कृत-विश्वविद्यालयस्य 'ज्ञानभारतम्'-केन्द्रस्य तथा च योगेश्वर- हस्तलेख- सङ्ग्रहालयस्य (नागपुरम्) संयुक्तसमन्वयेन मराठी-हस्तलेख-प्रदर्शनी आयोजिता। अस्याः प्रदर्शिन्याः आयोजने ग्रन्थपालस्य डॉ. दीपककापडे-महोदयस्य विशेषसहयोगः प्राप्तः।

मराठीसाहित्यस्य महानुभावपन्थेन सम्बद्धां समृद्ध-वाङ्मय- परम्परां प्रदर्शयन्तः विविधाः प्राचीनाः हस्तलेखाः अस्यां प्रदर्शिन्यां समाविष्टाः। महानुभाव- साहित्यस्य मौलिकताम्, प्राचीनताम्, ऐतिहासिकतां, मराठी-भाषायाः विकासे तस्य योगदानं रेखाङ्कितवन्तः लीळाचरित्रम्, स्थानपोथी, रत्नमाला, लक्षणबन्धः, रुक्मिणीस्वयंवरम् तथा स्थलपोथी इत्यादीनां हस्तलेखानां प्रतयः प्रदर्शिताः। एते सर्वे दुर्लभाः ग्रन्थाः सकळ-, सुन्दरा-, कवीश्वरी- वज्रलिपिषु लिखिताः सन्ति। अस्मिन् आयोजने डॉ. भारतभूषणशास्त्रिणः, प्रो. तृषाल- रामटेके- महोदयस्य, विक्की- पिपरेवार-महोदयस्य, किशोर-भोयर-महोदयस्य च सहयोगः प्राप्तः।



ब्रह्मवैवर्तपुराणस्य संक्षिप्तः कथापरिचयः

अष्टादशमहापुराणेषु ब्रह्मवैवर्तपुराणमेकं सर्वोत्कृष्टं, भक्तिरसप्लावि च पुराणमस्ति। अस्मिन् पुराणे ब्रह्मणः विवर्तस्य अर्थात् परमात्मनः श्रीकृष्णस्य इच्छया प्रकृतेः सृष्ट्याश्च विकासस्य दिव्यं रहस्यं निरूपितमस्ति। एषः महाग्रन्थः मुख्यरूपेण चतुर्षु खण्डेषु विभक्तोऽस्ति, यत्र सङ्कल्प्य १८,००० श्लोकाः सन्निविष्टाः सन्ति।

१. चतुर्णां खण्डानां कथा-कलेवरम्

ब्रह्मखण्डः- अस्मिन् प्रथमे खण्डे परमात्मनः श्रीकृष्णस्य प्राकट्यं, गोलोकस्य महिमा, तथा च ब्रह्मणः द्वारा सृष्ट्युत्पत्तेः प्रक्रिया वर्णिता अस्ति।

प्रकृतिखण्डः- अत्र प्रकृतेः पञ्चरूपाणां (दुर्गा, राधा, लक्ष्मी, सरस्वती, सावित्री च) दिव्यमाहात्म्यं, तासां पूजाविधानञ्च सुस्पष्टं वर्णितम्।

गणेशखण्डः- अत्र विघ्नहर्तुः गणेशस्य जन्म, तस्य गजमुखत्वस्य रहस्यं, तस्य दिव्यलीलानामाख्यानं च वर्तते। श्रीकृष्णजन्मखण्डः- एषः अस्य पुराणस्य विशालतमः, मुख्यतमांशश्च अस्ति, यत्र भगवतः श्रीकृष्णस्य पूर्णावतारस्य, राधामधुसूदनयोः गोलोकलीलायाः च रसमयम् आध्यात्मिकं च वर्णनं प्राप्यते।

२. राधातत्त्वस्य सर्वोत्कृष्टं निरूपणम्

ब्रह्मवैवर्तपुराणस्य सर्वप्रधाना विशेषता इयमेव यत् अत्र श्रीराधायाः स्वरूपं केवलं गोपिकारूपेण न, अपितु श्रीकृष्णस्य अर्धाङ्गिनीरूपेण, सृष्टेराद्याशक्तिरूपेण च प्रतिष्ठितम् अस्ति। गोलोके राधाकृष्णयोः गोपनीय-विवाहस्य, गोपी-गोपानां प्राकट्यस्य च कथाः भक्तहृदयं भावविभोरं कुर्वन्ति। एतद् पुराणमेव परवर्तिनि काले जयदेवादिमहाकवीनां काव्यप्रेरणायाः मुख्यस्रोतोऽभवत्।

३. सांस्कृतिकं दार्शनिकं च महत्त्वम्

अस्मिन् पुराणे केवलं कथाः एव न सन्ति, अपि तु आयुर्वेदस्य नियमाः, सदाचारसंहिता, दानमहिमा, कर्मविपाकस्य च (कर्मफलानाम्) गहनं विवेचनमपि अस्ति। एषः ग्रन्थः वैष्णवदर्शनस्य, संस्कृत- गीतिकाव्य- परम्परायाः च एकः अनुपमः आधारस्तम्भो वर्तते।

गोलोकनाथस्य हरेः चरित्रं,
राधापदाम्भोजसुधारसार्द्रम्।
ब्रह्मवैवर्तपुराणं पवित्रं,
शृण्वन्ति ये ते हि सुपुण्यवन्तः।।

भक्तिसाहित्यस्य, रसप्रस्थानस्य, संस्कृत-काव्यपरम्परायाः अनुसन्धानदृष्ट्या ब्रह्मवैवर्तपुराणम् एका अद्वितीया दिव्यमञ्जूषा वर्तते इति ॐ शम् ॐ।

लेखकः- आचार्यः दा. रुरुकुमारमहापात्रः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे युष्मभ्यं स्वागतं करोमि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। मया एका अतीव विचित्रा वार्ता पठिता।

चीन-देशीयया एकया महिलया षण्णवत्यधिकशतं (१९६) यान-स्थापन-स्थानानि क्रीतानि।

ततः तया तानि एव स्थानानि द्विगुणमूल्येन अन्येभ्यः भाटकरूपेण दत्तानि।

नन्दिनी- अहो! सा अतीव लोभ-युक्ता महिला। तया तु अनुचितं कार्यं कृतम्।

अन्या वार्ता अपि श्रूयताम्। एकेन यात्रिणा दश सजीवाः पक्षिणः निज-अन्तर्वस्त्रे गोपिताः।

सीमा-रक्षकैः सः यात्रिकः गृहीतः।

काव्या- हह! एतत् तु अतीव हास्यास्पदम्। अन्तर्वस्त्रे पक्षिणः! महद् आश्चर्यम् एव।

मया अपरा वार्ता अपि ज्ञाता। अजमेर-नगरे एकेन कारागार-अधिकारिणा हत्या-आरोपिताः बन्दिनः स्वगृहं नीताः। तैः बन्दिभिः तस्य गृहं स्वच्छीकृतम्।

नन्दिनी- कियत् भयङ्करम्! अपराधिनः गृहं नीताः! अधिकारिणा महान् नियमभङ्गः कृतः।

इदानीम् अन्तिमा वार्ता। ग्रेटर-नोएडातः लखनऊ-पर्यन्तं यात्राम् आचरता एकेन यात्रिणा श्रान्तः चालकः पृष्ठ-आसने शायितः।

यात्रिणा स्वयम् एव पञ्च-शत-किलोमीटर-पर्यन्तं यानं चालितम्।

काव्या- अहो! यात्रिणा चालकस्य साहाय्यं कृतम्। विचित्राः एव एताः घटनाः अस्मिन् लोके जाताः।

"संस्कृत कथा मञ्जरी" {३०} (३)
।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।
"अथ शालिवाहनयुद्धवर्णनं नाम चतुर्विंशतोपाख्यानम्"



ततः उभयददलं मिलितम्। तस्मिन् समये तत्र रणे, ततो विक्रमार्केण शालिवाहनस्य सैन्यं सर्वं पातितम्। तद्दृष्ट्वा शालिवाहनः शेषाभिधेयं पितरं नागेन्द्रं सस्मार। शेषेण च सर्पाः प्रेषिताः। तैः सर्पैर्दष्टं विक्रमादित्यसैन्यजातं विषेण मूर्च्छितं रणाङ्गणे पपात।

तदनन्तरं विक्रमार्को राजा एकाकी निजनगरं गत्वा स्वसैन्यसञ्जीवनार्थम् अर्धोदके स्थित्वा नववर्षपर्यन्तं वासुकि मन्त्रमजपत्। ततो वासुकिः तस्मिन् प्रसन्नो भूत्वा बभाण- भो राजन्! वरं वृष्णीष्व।विक्रमेण भणितं- भो सर्पराज! यदि मयि प्रसन्नोऽसि तर्हि सर्पविषवेगेन मूर्च्छितस्य मम सैन्यस्य सञ्जीवनार्थं मह्यं कश्चित् अमृतघटं देहि। अथ वासुकिना तथोम् [तथाऽस्तु] इति दत्तं तममृतघटं गृहीत्वा राजा विक्रमो यावत् मार्गे समायाति, तावत् ब्राह्मणः कश्चिदागत्य आशिषमुक्तवान्। ततो राजा भणितं- भो ब्राह्मण! कुतः समागतोऽसि? ब्राह्मणेनोक्तम्- अहं प्रतिष्ठाननगरादागत्। राज्ञोक्तं- किं वदसि? ब्राह्मणोऽवदत्- भवान् अर्थिजनचिन्तामणिः यतचिन्तितं वस्तु दातुं समर्थः, ममैकस्मिन् वस्तुनि प्रीतिरस्ति यदि तद्दीयते तर्हि वदामि। राज्ञोक्तं- ब्राह्मण! यत् त्वया याच्यते तत् दास्यामि। ब्राह्मणेनोक्तं- मह्यमयममृतघटो दातव्य | राज्ञोक्तं- त्वं केन प्रेषितोऽसि? ब्राह्मणेनोक्तम्- अहं शालिवाहनेन प्रेषितः। तत् श्रुत्वा राज्ञा विचारितं- मया पूर्वं किञ्चिदविचार्य्येव अस्मै दास्यामि इति भणितम्, इदानीं न दीयते चेत् तदा न केवलम् अपकीर्तिः अधर्मोऽपि भविष्यति, अतः सर्वथा मयेतत् दातव्यमेव। ततः राजानं निरुत्तरमालोक्य ब्राह्मणेन भणितं, भो राजन्! किं विचारयसि? त्वमतीव सज्जनोऽसि। सज्जनस्य भाषणं कदाऽपि पुनरन्यथा न भवति। तथा चोक्तम्-

"उदयति यदि भानुः पश्चिमे दिग्विभागे,
प्रचलति यदि मेरुः शीततां याति वह्निः।
विकसति यदि पद्मं पर्वताग्रे शिलायां,
न भवति पुनरन्यत् भाषणं सज्जनानाम्।।"

तदाकर्ण्य राज्ञोक्तं- सत्यमुक्तं भवता। तथैव क्रियते, गृह्यतामयम् अमृतघटः इत्युक्त्वा तस्मै घटं ददौ। सोऽपि ब्राह्मणः राजानं वर्णयन् निजस्थानं गतः। राजाऽपि उज्जयिनीमगात्।

इमां कथां कथयित्वा पुत्तलिका भोजराजमवोचत्- भो राजन्! त्वयि एवमौदार्य्यं धैर्य्यश्च विद्यते यदि तर्हि अस्मिन् सिंहासने समुपविश। राजा तूष्णीं स्थितः।

डा. वर्षा प्रकाश टोणगांवकर ©®
पुणे / महाराष्ट्रम्

आभ्यन्तरिकविषयेषु हस्तक्षेपं न कुर्यात् संयुक्तराष्ट्रसंघः

सीजेपी-प्रदर्शनोपरि संयुक्तराष्ट्रसंघस्य टिप्पण्या कुपितस्य भारतस्य स्पष्टवाक्यम्



दिल्ल्यां शनिवासरे सञ्जातानां विरोधप्रदर्शनघटनानाम् उपरि संयुक्तराष्ट्र-मानवाधिकार-उच्चायुक्त-कार्यालयस्य (OHCHR) टिप्पण्यां भारतेन आपत्तिः प्रदर्शिता। भारतेन उक्तं यत् ओएचसीएचआर-संस्थायाः चिन्ताः निर्मूलाः सन्ति तथा च एतानि भारतस्य आभ्यन्तरिकविषयेषु अस्वीकार्यः हस्तक्षेपः अस्ति। ओएचसीएचआर-संस्थया दिल्ल्यां प्रदर्शनात् पूर्वं तस्मिन् समये च प्रदर्शनकारिणः, नागरिकसमाजस्य जनान्, अधिवक्तॄन्, पत्रकारांश्च बन्दिग्रहे (हिरासत) स्थापयितुं वार्तासु चिन्ता प्रकटिता आसीत्। सहैव शान्तिपूर्णप्रदर्शनस्य अधिकारस्य सम्मानं कर्तुम्, आरक्षककार्ये संयमं रक्षितुम्, स्वेच्छाचारतया निरुद्धानां सर्वेषां जनानां शीघ्रमशर्तं च मुक्तिं दातुं प्रार्थना कृता आसीत्।

अन्तर्राष्ट्रियस्तरे प्राप्ताम् एतां टिप्पणीं भारतेन सर्वथा निराकृत्य उक्तं यत् देशस्य सार्वभौमत्वे आभ्यन्तरिकविषयेषु च ईदृशं वक्तव्यं सर्वथा न सहिष्यते। भारतेन स्पष्टतया उक्तं यत् संयुक्तराष्ट्रसंघेन स्वस्य वैश्विकजनादेशस्य पालनं कुर्वता निष्पक्षतया भेदभावं विना च विश्वस्य अन्येषु भागेषु जायमानेषु बृहत्स्तरीयेषु प्रदर्शनेष्वपि ध्यानं दातव्यम्। भारतेन लोकतान्त्रिकमूल्यानि रेखाङ्कितानि कृत्वा उक्तं यत् भारतं विश्वस्य बृहत्तमः लोकतन्त्रः वर्तते, यत्र नागरिकाणां कृते शान्तिपूर्णसभाकरणस्य सांविधानिकः अधिकारः प्रदत्तः अस्ति।

मिस्रदेशे उदयवीरसिद्धू महोदयेन लक्ष्यभेद-

विश्वचषके पुरुषाणां १० मीटर् वायुपिस्तोल-स्पर्धायां स्वर्णपदकं विजितम्

पीटीआइ, काहिरा। भारतस्य उदयवीरसिद्धू महोदयेन रविवासरे अन्ताराष्ट्रिय-लक्ष्यवेध-क्रीडा-महासंघस्य (ISSF) राइफल/पिस्तोल-विश्वचषके पुरुषाणां १० मीटर् वायुपिस्तोल-स्पर्धायां (एयर पिस्टल) स्वर्णपदकं स्वनाम्नि कृतम्। चतुर्विंशतिवर्षीयः उदयवीरः पदकप्रतिस्पर्धायां उत्कृष्टं प्रदर्शनं कुर्वन् २४०.६ अङ्कान् सम्प्राप्तवान्। सः जर्मनीदेशस्य ओलम्पिक-पदकविजेतारं क्रिश्चियन-रिट्ज-महोदयं ०.५ अङ्कैः पराजित्य स्वर्णपदकं जितवान्। रिट्ज-महोदयः २४०.१ अङ्कैः सह रजतपदकं, इटलीदेशस्य पाओलो-मोन्ना-महोदयः च २१९.८ अङ्कैः सह कांस्यपदकं प्राप्तवान्। उदयवीरः अन्तिमचरणे संमर्देऽपि (दबावमध्ये) स्वधैर्यं रक्षितवान्। अन्तिमयोः द्वयोः प्रहारयोः (शाटयोः) पूर्वं सः रिट्ज-महोदयात् ०.३ अङ्कैः पश्चात् आसीत्। भारतीय-लक्ष्यवेधकेन अन्तिमयोः द्वयोः प्रहारयोः १०.२ तथा ९.८ अङ्काः प्राप्ताः, यदा तु रिट्ज-महोदयेन निरन्तरं द्विवारं ९.६ अङ्काः अर्जिताः। एवम् प्रकारेण उदयवीरः अन्तिमेन प्रहारेण विजयं प्राप्तवान्।



भारते 'स्टारलिङ्क' आनेतुं दृढनिश्चयी मस्कः, उक्तवान्—कम्पनीनां प्रतिस्पर्धायाः वृद्ध्या ग्राहकेभ्यः लाभः भविष्यति



स्पेसएक्स-संस्थायाः प्रमुखः एलोन्-मस्कः भारते स्वस्य उपग्रह-अन्तर्जाल-सेवाम् (सैटेलाइट इंटरनेट स्टारलिङ्क) आरब्धुं पुनः एकदा आग्रहं कृतवान्। सः अवदत् यत् भारतीयविपण्यां प्रतिस्पर्धायाः वृद्ध्या सामान्यजनेभ्यः अधिकाः विकल्पाः लप्स्यन्ते तथा च अस्य लाभः ग्राहकेभ्यः भविष्यति। मस्कः रिलायन्स-इण्डस्ट्रीज-संस्थायाः अध्यक्षं मुकेश-अम्बानीम् अपि लक्षीकृतवान्। सः अम्बानी-समर्थकानां तर्केषु विरोधाभासं प्रदर्शयन् तान् व्यर्थं द्वैधभावं तथा अतिशयोक्तिपूर्णं च अकथयत्। मस्कस्य इयं टिप्पणी तस्मिन् समये आगता, यदा सः भारते स्टारलिङ्क-सेवा-प्रारम्भे जायमानं विलम्बम् अधिकृत्य निरन्तरं प्रश्नान् उत्थापयति। रिलायन्स-संस्था देशस्य दूरसञ्चारक्षेत्रस्य प्रमुखासु कम्पनीषु अन्यतमा अस्ति। एलोन्-मस्कः रविवासरे 'एक्स' (X) इति सामाजिकमाध्यमे अलिखत् यत् स्टारलिङ्क-सेवा भारतम् आगच्छति चेत् सामान्यनागरिकाः अधिकाधिकान् विकल्पान् प्राप्स्यन्ति। सः न्यवेदयत् यत् एतेन अम्बानी-महोदयस्य लाभः न्यूनः भवितुम् अर्हति, किन्तु तस्य व्यापारः न स्थगयिष्यते। यदि भारते स्टारलिङ्क-सेवाः व्ययबहुलाः (महंगी) भविष्यन्ति, तर्हि जनाः तासां प्रयोगं न करिष्यन्ति। एवं सति कम्पनी स्वमूल्यानि ग्राहकाणां सामर्थ्यानुसारं स्थापयिष्यति। सः अम्बानी-अन्तर्जालव्यापारस्य समर्थनं कुर्वतां जनानां तर्केषु प्रश्नं कुर्वन् अवदत् यत्—एकतः तु इदं निगद्यते यत् स्टारलिङ्क भारते अम्बानी-संस्थायाः न्यूनमूल्यसेवानां सम्मुखे स्थातुं न शक्ष्यति, अपरतः च तां एतावतीं बलवतीं प्रतिस्पर्धिनीं मन्यन्ते यया वर्तमानव्यापाराय सङ्कटः भवितुं शक्नोति।

सर्वकारेण 'राष्ट्रीय-इस्पात-नीति-२०४७' इत्यस्याः प्रारूपं प्रकाशितम्; ६०४ दशलक्ष-टन-परिमितस्य अयस्-उत्पादन-क्षमतायाः लक्ष्यम्

सर्वकारेण 'राष्ट्रीय-इस्पात-नीति-२०४७' इत्यस्याः प्रारूपं (मसौदा) प्रकाशितम्। अस्मिन् भारतस्य अनिर्मित-अयसः (क्रूड स्टील) उत्पादनक्षमतां वर्तमानकालात् प्रायः २२० दशलक्ष-टनेभ्यः प्रवर्ध्य २०४७ वर्षपर्यन्तं ६०४ दशलक्ष-टन-परिमितं कर्तुं लक्ष्यं निर्धारितम् अस्ति। नवीननीतौ अयस्-क्षेत्रात् जायमानस्य अङ्गाराम्ल-उत्सर्जनस्य (कार्बन-उत्सर्जनस्य) न्यूनीकरणार्थं तथा वर्धमानां याचनां पूरयितुं लोह-खनिजस्य 'कोकिंग-कोल' इत्यस्य च उपलब्धतायाः प्रवर्धनाय रूपरेखा निर्मिता। अयस्-उत्पादनस्य व्यये एतेषां कच्चा-सामग्रीणां भागः ६५ तः ७० प्रतिशतं यावत् भवति। भारतं लोह-खनिजस्य विषये बहुधा स्वावलम्बी अस्ति, किन्तु 'कोकिंग-कोल' इत्यस्य आवश्यकतायाः बृहद्भागम् आयातं करोति।



अयस्-क्षेत्रे सामान्य-अङ्गाराम्ल-उत्सर्जन-तीव्रतां वर्तमानात् २.५४ टन-परिमित-कार्बन-डाइऑक्साइड् प्रति टन क्रूड-स्टील इत्यस्मात् न्यूनीकृत्य २०४७ वर्षपर्यन्तं १.५४ टन-परिमितं कर्तुं लक्ष्यं निश्चितम्। इदं लक्ष्यं भारतस्य २०७० वर्षपर्यन्तं 'नेट-जीरो-उत्सर्जनम्' इति उद्देश्यस्य अनुरूपम् अस्ति।